स्याकांक्षावादः

पत्राणि ८

१५५२

ॐ श्रीगणेशाय नमः ॥ सिद्धान्ताद्ये विलक्षणप्रमायां तत्करणतया शब्दज्ञानस्य स्वतन्त्रप्रमाणता प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रे शब्दपदं शब्द-
ज्ञानपरं अतीतानागतशब्दानुसन्धानादपि शाब्दबोधाद्युदयस्य तदेकत्वासम्भवात् । शब्दज्ञानस्य शाब्दत्वावच्छिन्नं प्रति शब्दज्ञानत्वेन वर्णज्ञानत्वेन वा हेतुता । वर्णत्वं
च ध्वनिव्यावृत्तश्रवणग्राह्यनिष्ठजातिविशेषः । सामान्यसामग्र्या विशेषसामग्रीसमवहितया एव कार्यजनकत्वान्निराकाङ्क्षादिशाब्दज्ञानान्न शाब्दरूपसामान्यधर्माव-
च्छिन्नापत्तिः । तत्तद्धर्मविषयकशाब्दत्वावच्छिन्ने हेतुभूतपदज्ञानजन्यतत्तदर्थोपस्थितिरूपाया स्तत्तदर्थविशेष्यकतत्तत्संसर्गकतत्तदर्थप्रकारकशाब्दत्वावच्छिन्ने हेतुभू-
ततत्तदर्थोपस्थापकपदनिरूपिततत्तदाकाङ्क्षादिज्ञानरूपायाश्च विशेषसामग्र्या विरहात् । यद्येवं विशेषसामग्रीत एव निर्वाहे कृतं सामान्यकारणतया विशेषसामग्री-
जन्यतावच्छेदककोटौ शाब्दत्वनिवेशस्यावश्यकतयैव कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकत्वोपपत्तेः । अस्तु वा लाघवाज्ज्ञानत्वेनाल्पत्वेनैव वा शाब्दत्वावच्छिन्नं प्रति हे-
तुत्वेति चेन्न । शब्दज्ञानस्यैतत्कालीनशाब्दज्ञानसामान्यानुत्पादे तत्तद्विशेषसामग्रीविरहकूटस्य प्रयोजकत्वापेक्षया शब्दज्ञानत्वावच्छिन्नाभावस्य वर्णत्वावच्छिन्नाभावस्य ज्ञान
वैकस्य प्रयोजकत्वे लाघवेन सामान्यकारणताया अपि सप्रमाणकत्वात् । ईदृशलाघवानुरोधेन कारणत्वसिद्धौ स्मृतिस्वर्गादौ संस्कारादृष्टादीनां हेतुताविलयप्रसङ्गात् ।
तादृशकारणसमवधानवतोऽपि पुंसः कदाचिदेव स्मृतिस्वर्गादिरूपकार्यस्य जायमानत्वेन तादृशनियमनिर्वाहाय अननुगतानामुद्बोधकानां कालविशेषाणां च विशेषसामग्रीत्व-
कल्पनाया आवश्यकत्वात्तत एवोपपत्तेः । अत एव यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपीति प्राचां प्रवादोऽपि सयुक्तिकः । यद्येवं पदज्ञानत्वेनैव शाब्द-
त्वावच्छिन्ने हेतुत्वकल्पनमुचितं न तु वर्णज्ञानत्वेन निरर्थकवर्णज्ञानदशायां वर्णज्ञानत्वावच्छिन्नाभावासत्त्वेन तत्कालीनशाब्दसामान्याभावादेः विशेषसामग्र्यभावानां प्रयोज-
कत्वकल्पने गौरवात् । न च वर्णानां निरर्थकत्वमेव न संभवति एकाक्षरकोशे प्रत्येकं सकलवर्णानामेव शक्तिप्रतिपादनात् । तथा च पदज्ञानाभावो वर्णज्ञानाभावनियत एवेति ।
तोक्तगौरवावकाश इति वाच्यम् । वस्तुतः शक्तिमत्पदज्ञानत्वादिरूपशाब्दज्ञानत्वावच्छिन्नाभावस्य वर्णज्ञानत्वावच्छिन्नाभावनियतत्वेऽपि शाब्दशक्तिविषयकज्ञानत्वावच्छिन्नाभाव-
स्यानियतत्वम् । तेन रूपेण हेतुत्वे लाघवं ज्ञानानुपायात् । लक्षणाज्ञानाधीनशाब्दबोधकाले विशिष्टशक्तिज्ञानमावश्यकमेव सर्वत्र लाक्षणिकस्थलेऽन्वयबोधस्य प्राचीनैरनभ्युप-
गमात् । विशिष्टवाक्यार्थघटकयत्किञ्चिदर्थे शक्तिज्ञानस्यावश्यापेक्षणीयत्वात् । आकाङ्क्षासम्बन्धान्वयमात्रकायाल्लक्षणायाः शक्तिवदिति न्यायालक्षणाज्ञानस्यैव शक्तिज्ञानात्मक-
त्वाच्चेति न व्यभिचार इति चेदिष्टत एव निरुक्तपदज्ञानत्वेनैव शाब्दबोधहेतुता । निराकाङ्क्षस्थले कर्मत्वमानयनं कृतिरिति वाक्याद् घटमानयेत्यादाविव कर्मत्वानयनकृत्यादि-
घटककर्मत्वानयनादीनामाधेयत्वनिरूपकत्वविषयिकत्वादिसम्बन्धेनान्वयबोधानुत्पादात् आकाङ्क्षाज्ञानस्य हेतुता स्वीक्रियते तद्रूपावच्छिन्नपदविषयिकोपस्थितिव्य-
तिरेकप्रयुक्तः प्रकृतान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगितावच्छिन्नपदविषयिकोपस्थितिको यो धर्मस्तद्वत्त्वमेव तद्रूपावच्छिन्नपदनिरूपिताकाङ्क्षा । कर्मत्वविशेष्य

पत्र
८

तत्कालीनतत्पुरुषीय=   तद्रूपावच्छिन्नपदसमभिव्याहार

आकाङ्क्षावाद
२

काऽधेयत्वादिसंसर्गकघटादिप्रकारकान्वयबोधे चामादिपदे घटादिपदादिनिरूपितायास्तादृशाकाङ्क्षायास्तादृशान्वयबोधे घटपदत्वाद्यवच्छिन्नविषयकोपस्थितेरम्पदत्वाद्य-
वच्छिन्नविषयकोपस्थितेश्च हेतुतया तदवच्छिन्नाभावयोः प्रकृतान्वयबोधाभावेऽपि कारणाभावमुद्रया प्रयोजकत्वात् प्रयोज्यप्रयोजकभावश्च कार्याभावकारणाभावयोः।
स्वरूपसम्बन्धविशेषः पदार्थान्तरमेव वा न च तत्र मानाभावः दण्डाभावाद्घटाभाव इत्यादेः प्रतीतेरेव मानत्वात् कर्मत्वादिपदार्थोपस्थितेश्च तादृशान्वयबोधहेतुतया अप्र-
माणकत्वात् न तद्व्यतिरेकः तादृशान्वयबोधाभावप्रयोजक इति न कर्मत्वादिपदे घटादिपदस्य तादृशान्वयबोधोपयोगिनी आकाङ्क्षा अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यता-
मित्यादौ पुरुषविशेष्यकराजसम्बन्धप्रकारकबोधतात्पर्यस्थले तथाविधबोधोदयेन राज्ञः पुरुष इत्यादिपदोपस्थितीनां हेतुताया आवश्यकत्वात् तथाविधपदोपस्थि-
तिव्यतिरेकाणां तादृशान्वयबोधाभावप्रयोजकत्वात् यत्र तु तत्पदार्थान्वितस्वार्थप्रतीतीच्छयैव राजसम्बन्धादिकमुच्चरितं न तु पुरुषपदार्थान्वितस्वार्थप्रतीतीच्छया तत्र तादृशपद-
योः परस्परसाकाङ्क्षावारणाय द्वितीयपदे तद्रूपावच्छिन्नपदसमभिव्याहृतत्वमपि निवेशनीयं तस्माद समभिव्याहारस्य तत्पदोपस्थापितार्थान्वितस्वार्थविषयकप्रतीतिजनक-
त्वप्रकारकेच्छाविषयित्वं प्रकृतान्वयबोधाभावेऽपि तत्कालीनत्वं तत्स्वरूपे योग्यत्वे निवेशनीये अतो न जनितान्वयबोधदशायामतिप्रसङ्गः वस्तुतस्तु परस्परसमभिव्याहृततत्तद्रू-
पावच्छिन्नपदोपस्थितिव्यतिरेकप्रयुक्तान्वयबोधाभाववत्त्वस्वरूपनिष्ठप्रकृतान्वयबोधे तत्तद्रूपावच्छिन्नपदयोराकाङ्क्षा एतस्य च तत्कालीनत्वाप्रवेशेऽपि न क्षतिः अयं दवि-
न्वयः इत्थमाकाङ्क्षानुसरणे सती हेतुः अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ समभिव्याहारभ्रमेण पुरुषे राजसम्बन्धबोधानुपपत्तेः समभिव्याहारघटितनिरुक्ताकाङ्क्षा-
यास्तत्रासत्त्वात् एवं घटः कर्मत्वमित्यादावपि कर्मत्वादिपदे अम्पदत्वभ्रमदशायां घटमानयेत्यादाविवान्वयबोधस्य सर्वानुभवसिद्धत्वात्तदनुपपत्तेश्च नापि तादृशाकाङ्क्षा-
ज्ञानं हेतुः तथा सति कर्मत्वादिपदज्ञानं घटपदज्ञानव्यतिरेकप्रयुक्तकर्मत्वादिविधेयकाधेयत्वादिसंसर्गकघटप्रकारकान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगित्वे
तादृशभ्रमाद्घटपदज्ञानाभावात्कर्मत्वज्ञानाभावाच्च तथाविधबोधाभावस्य तादृशभ्रमोत्तरं द्वितीयकर्मत्वेन तथाविधान्वयबोधापत्तेः अथ घटत्वकर्मत्वयोरैक्याभावादिविषयक अ- घटीयं कर्मत्वं =
म्पदत्वावच्छिन्नविशेष्यकघटपदज्ञानव्यतिरेकप्रयुक्ततथाविधान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगित्वप्रकारकज्ञानत्वादिना तथाविधान्वयबोधाभाववि-
शेष्यकघटपदज्ञानव्यतिरेकाम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानत्वादिना वा तथाविधान्वयबोधे हेतुता वाच्या तथा च कर्मत्वपदत्वप्रकारकज्ञानात्कदाचिद-
पि तादृशान्वयबोधानुदयेन कर्मत्वपदत्वाद्यवच्छिन्नविशेष्यकनिरुक्तव्यतिरेकप्रतियोगित्वप्रकारकज्ञानस्य प्रकृतान्वयबोधाभावविशेष्यककर्मत्वपदत्वाद्यवच्छिन्नविषयि-
कज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानस्य वा हेतुतायामुक्तलाघवेन नात्रोक्तभ्रमात्तथाविधान्वयबोधापत्तिरिति चेन्न हि तादृशान्वयबोधे लाघवाद्घटपदत्वप्रकारकज्ञा-
नत्वापेक्षया अम्पदत्वप्रकारकज्ञानत्वेनैव हेतुतास्तु न तु एवं घटः कर्मत्वमित्यादौ दर्शितान्वयबोधवारणसम्भवात् किं निरुक्तगुरुशरीराकाङ्क्षाज्ञानहेतुतया न च।

कर्मत्वादिविशेष्यकआधेयत्वादिसंसर्गकबोधे घटपदज्ञानत्वाम्पदत्वादिना द्विविधकारणताकल्पनापेक्षया निरुक्ताकाङ्क्षाज्ञाने हेतुत्वे नैकहेतुताकल्पने ला-
घवमिति वाच्यम् तथाप्यस्मदुक्तविशेष्यकस्य घटपदस्याकाङ्क्षादिप्रकारकज्ञानस्य घटपदविशेष्यकस्याम्पदाकाङ्क्षाप्रकारकज्ञानस्य वा हेतुत्वे विनिगमनाविरहे-
ण कारणताद्वयस्यावश्यकत्वात् द्वितीयकल्पे पि घटपदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकत्वाम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारत्वयोः कारणतावच्छेदकयो-
र्मिथो विशेषणविशेष्यभावे विनिगमकाभावेन कारणताद्वैध्यस्यावश्यकत्वात् अथ कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकबोधे ऽम्पदत्वप्रकारकज्ञानत्वे-
न च हेतुत्वं कल्पयितव्यम् अतः कर्मत्वमित्यादौ नाहृशान्वयबोधवारणसम्भवे पि घटमानयेत्यादौ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ च तत्तत्पदयोः समभिव्या-
हारस्य संशये व्यतिरेकनिश्चये च तत्तत्पदयोरन्वयबोधापत्त्या समभिव्याहारघटितनिरुक्ताकाङ्क्षाज्ञानहेतुत्वमावश्यकमिति चेन्न तर्हि तादृशान्वयपदार्थान्वयबोधे
तत्पदसमभिव्याहारज्ञानत्वेनैव हेतुत्वकल्पनस्यौचित्यम् न चैवमन्वयानुभवे जाते पुनरन्वयबोधापत्तिः अनुमितौ सिद्धेरिव शाब्दबोधे ऽन्वयानुभवस्य प्रतिबन्धक-
त्वोपगमात् न चान्वयानुभवाभावस्य समभिव्याहारस्य च कारणद्वयकल्पनापेक्षया निरुक्ताकाङ्क्षाज्ञानस्यैव हेतुताकल्पनमुचितमिति वाच्यम् निरुक्ताकाङ्क्षा-
ज्ञानस्य हेतुत्वे पि स्वरूपसतो न्वयानुभवाभावस्य हेतुताया आवश्यकत्वात् अन्यथान्वयानुभवे जाते पि शब्दादिना तदभाववद्घटिताकाङ्क्षाज्ञानसंभवेन शाब्दबोधापत्ति-
तादवस्थ्यात् न च स्वविशेष्यकसमभिव्याहृततत्पदज्ञानव्यतिरेकप्रयुक्तान्वयानुभवाभाववत्ज्ञानस्यैव हेतुत्वं वाच्यम् तादृशं च ज्ञानमन्वयानुभवकाले शब्दादि-
नापि न संभवति आत्मविशेषगुणस्थले स्वरूपसत एव प्रतियोगिनो विपरीतज्ञानविरोधित्वादिति वाच्यम् स्वत्वाननुगमेन तत्तत्पुरुषीयान्वयबोधं प्रति तत्तत्पुरुषविशे-
ष्यकनिरुक्तान्वयानुभवाभावज्ञानत्वेनैव हेतुताया वक्तव्यतया तत्तत्पुरुषभेदेनानन्तकारणताप्रसङ्गात् अस्मन्मते ऽन्वयानुभवाभावस्यात्मनिष्ठप्रत्यासत्त्या कारणत्वेनैवा-
तिप्रसङ्गभङ्गात् पुरुषभेदेन तद्धेतुताभेदाभावात् न च मयापि तत्तत्पुरुषीयत्वमप्यनन्तर्भाव्य समवायसंबन्धेनान्वयबोधं प्रति समवायविशिष्टविशेष्यताप्रत्यासत्त्ये-
व निरुक्तान्वयानुभवाभावरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वं कल्पनीयमिति नातिप्रसङ्गो न वा पुरुषभेदेन कारणताभेद इति वाच्यम् विशेष्यताविशिष्टसमवायस्या-
पि प्रत्यासत्तितामात्रे द्वयविनिगमनाविरहात् एवमन्वयानुभवाभावज्ञानस्य हेतुत्वे विनश्यदवस्थान्वयानुभवाभावस्य ज्ञानादन्वयबोधात्प्राक्तनक्षणे ऽपि द्विती-
यक्षणे ऽन्वयबोधान्तरोत्पत्तिर्वज्रलेपायितैव न च विषयिताविशिष्टसामानाधिकरण्यसम्बन्धेन निरुक्तान्वयानुभवाभावविशिष्टज्ञानत्वेनैवाकाङ्क्षाज्ञानस्य
हेतुताकल्प्यते अन्वयानुभवदशायां च न तादृशसम्बन्धेनान्वयानुभवाभावविशिष्टज्ञानमस्तीति नातिप्रसङ्ग इति वाच्यम् सामानाधिकरण्यविशिष्टविषयि-

आकाङ्क्षा तासम्बन्धेनान्वयानुभवाभावविशिष्टनिवेशमादाय विनिगमनाविरहप्रसङ्गात् एवं यत्र चरमानयेत्याद्यानुपूर्वीविशेषावच्छिन्नपदज्ञानं पदार्थोपस्थित्यादिकमन्वया
वाद २ नुभवाभावश्च स्वरूपसद्धियते न तत्पदज्ञानान्वयानुभवाभावयोर्ज्ञानम् न तत्पदज्ञानविरहान्वयानुभवाभावयोः प्रयोज्यप्रयोजकभावज्ञानम् तथापि शाब्दबोधस्यानु
भाविकतया नो ज्ञाकाङ्क्षाज्ञानस्य शाब्दधीहेतुत्वसम्भवात् यत्राकाङ्क्षाज्ञानं साकाङ्क्षत्वव्यवहारे वोपयुज्यते शाब्दबोधे तु तद्घटकसमभिव्याहारांशमात्रस्य ज्ञानं स्वरूप
सदन्वयानुभवाभावश्च हेतुः न च समभिव्याहारज्ञानस्य हेतुतायां मानाभावः अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतां विमलं जलं नद्याः कच्छे महिषश्चरति इत्यादौ राजसम्ब
न्धपुरुषयोर्नदीसम्बन्धकच्छयोश्चान्वयेऽवच्छिन्नस्तात्पर्याभावात् तात्पर्यज्ञानरूपकारणविरहेऽपि वक्तृत्वयबोधानुत्पाददोषोपपत्तेः तात्पर्यभ्रमसत्त्वे तथाविधान्वयबोधस्येष्टत्वादि
ति वाच्यम्। तात्पर्यज्ञानं हि राजपदमितरान्वितराजपरमित्याकारकं सामान्यतः एकैकपदार्थविशेष्यकं तच्छापरपदार्थमवगाहमानं शाब्दबोधहेतुः न तु राजपदं पुरु-
षान्वितराजपरमित्याकारकं विशेषतः पदार्थद्वयविषयम् तथा सति राजादिरूपैकैककार्थमन्तर्भाव्य पुरुषादिरूपसहस्रार्थभेदेन राजपदधर्मिकतात्पर्यज्ञानस्य सहस्र
सन्नते कारणताप्रसङ्गात् एकैकपदधर्मिकतात्पर्यज्ञानस्यैकैकस्वार्थमन्तर्भाव्यैकैककारणताकल्पनेनैवोपपत्तेः एवं च यत्र राज्ञः पुत्रोऽपि पुरुषस्यापसारणेनैवान्वयबोधः तत्रा
प्यावश्यकाभ्यां राजपदमितरान्वितराजपरं पुरुषपदमितरान्वितपुरुषपरमित्याकारकतात्पर्यज्ञानाभ्यां राजपुरुषयोरन्वयबोधप्रसङ्गो दुर्वार एवेति राजपदपुरुषपदा
र्थयोरन्वयबोधे राजपदं पुरुषपदोपस्थापितार्थान्वितस्वार्थप्रतीतिजनकत्वाभिप्रायकमित्याकारकसमभिव्याहारज्ञानस्य हेतुत्वमावश्यकमेव। न चैवं राजाद्येकैकपद
धर्मिकसमभिव्याहारज्ञानस्य पुरुषाद्यपरसहस्रपदार्थमन्तर्भाव्य सहस्रकारणतायाः ग्रन्थतात्पर्यज्ञानकारणतावत् तस्य च कल्पनापेक्षया अर्थतज्ज्ञानस्यैव विशिष्यपदा-
र्थविषयिकत्वमन्तर्भाव्य कारणताकल्पनमुचितमिति वाच्यम्। यतो विशिष्य पदार्थद्वयविषयिकत्वमन्तर्भाव्य तज्ज्ञानस्य हेतुत्वोपगमे शक्यपालनरूपणया च राज
पदोपस्थापितत्वप्रहेमकाराद्यर्थसहस्रस्यैकैकमन्तर्भाव्य पुरुषादिरूपसहस्रार्थभेदेन कारणतासहस्रस्य कल्पनीयतया राजपदधर्मिकस्यैव तात्पर्यज्ञानस्य सहस्रपु-
णितसहस्रकारणताकल्पनम् अस्माकं तु राजपदस्य स्वार्थसहस्रभेदेन तद्धर्मिकार्थतात्पर्यज्ञानस्य कारणतासहस्रं समभिव्याहारज्ञानहेतुतायां विशिष्यपदार्थानन्त-
र्भावेन राजपदधर्मिकस्य सहस्रापरभेदेन कारणतासहस्रं कल्पनीयमिति स्फुटतरं लाघवमिति अथैवमप्यनुभवाभावरूपस्याकाङ्क्षाघटकभावस्य शाब्दबोधहे-
तुत्वं विचारासहं शाब्दत्वावच्छिन्नं प्रति शाब्दत्वेन तद्विषयिकशाब्दत्वावच्छिन्नं प्रति तद्विषयिकशाब्दत्वेन प्रतिबन्धकत्वे सैन्धवमानयेत्यादौ लवणादिरूपैकार्थविष- २
यिकशाब्दबोधसत्त्वे अश्वरूपापि घोटकादिरूपार्थान्तरविषयिकान्वयबोधानुपपत्तेः घटकर्मत्वादिरूपार्थान्तरवाक्यार्थबोधानन्तरं घटकर्मकानयनरूपमहावाक्यार्थ

त्वानानुदयप्रसङ्गाच्च नच पदानुसन्धानव्यक्तित्वतद्व्यक्तित्वेनोपादाय तत्तत्पदानुसन्धानजन्यशाब्दत्वेन प्रतिबन्धकत्वान्न दोषः अवान्तरवाक्यार्थबोधा
नन्तरं पुनस्तत्पदानुसन्धानान्तरमभ्युपगम्यैव महावाक्यार्थबोधोपगमादिति वाच्यम् एवं सति जनितान्वयबोधकपदानुसन्धानादनुसन्धानान्तरं वि
नैव शाब्दसामान्यापत्तेः नच विशेषसामग्रीसमवहितायाएव सामान्यसामग्र्याः फलजनकत्वात्तदनुसन्धानजन्यशाब्दबोधाभावरूपविशेषसामग्रीविर
हान्नोक्तापत्तिः अथवा तत्तदर्थविषयिकशाब्दबोधत्वावच्छिन्नं प्रति सामान्यतस्तत्तदर्थविषयिकशाब्दबोधत्वेनैव प्रतिबन्धकताऽनुसन्धानान्तरव्यक्तीनामुत्ते
जकत्वोपगमान्न महावाक्यार्थबोधादेवाऽवान्तरवाक्यार्थबोधानन्तरमनुपपत्तिः उद्दीचानुसन्धानव्यक्तीनां च स्वजन्यबोधप्रागभावविशिष्टत्वेनैवोत्तेजकता
वाच्या अतो न तादृशानुसन्धानजन्यबोधानन्तरं तादृशानुसन्धानव्यक्तित्वानुसन्धानान्तरं विनैवान्वयबोधप्रसङ्गः इति वाच्यम् गौरवात् अयमेति पुत्रो राजः
पुरुषोपसार्यतामित्यादौ राजपुत्रान्वयबोधोत्पत्तिक्षणे च राजपुरुषान्वयबोधोत्पादप्रयोजकतात्पर्यज्ञानाभावात्तथाविधसमभिव्याहारज्ञानाभावाद्वेवात
दुत्तरमपि तादृशान्वयबोधानुत्पादसम्भवात् अन्वयबोधं प्रत्यऽन्वयबोधस्य प्रतिबन्धकत्वेमानाभावात् नच समानाकारावगाहिशाब्दबोधापत्तिवारणायान्वया
नुभवाभावस्य हेतुत्वमावश्यकमिति वाच्यम् प्रथमशाब्दबोधक्षणे च तज्जनकपदज्ञानजन्यपदार्थोपस्थित्यादीनां विनाशात्तादृशकारणविरहेणैवाऽविरलक्रियो
त्पन्नशाब्दबोधधाराया अप्यसम्भवात् अन्तरापदज्ञानजन्यपदार्थोपस्थित्युत्पादस्थलेऽपि वान्वयबोधस्य तादृशपदार्थोपस्थितिकाले विनाशात्तदुत्तरमन्व
यबोधानन्तरस्य भवतोऽप्यावश्यकत्वात् यत्र प्रथमशाब्दबोधजनकपदार्थोपस्थितेरेवाकाङ्क्षायोग्यतासत्तितात्पर्यविषयिणी तत्र विनश्यदवस्थतादृशसमू
हालम्बनपदार्थोपस्थितितस्तादृशबोधद्वितीयक्षणे पुनस्तादृशबोधस्यापत्तिरिति चेन्न अन्वयानुभवस्य प्रतिबन्धकत्वे उक्तस्थले उत्पन्नायाएव शाब्दबोधव्यक्तेर
नन्तरक्षणे पुनरुत्पादवारणाय तत्तद्व्यक्तिप्रागभावस्य हेतुतानामनन्तानां कल्पनप्रसङ्गात् मन्मते सामान्यसामग्रीविरहादेव तादृशापत्तिवारणसम्भवात् अ
न्वयानुभवस्य प्रतिबन्धकताकल्पनमावश्यकम् नच तच्छाब्दबोधव्यक्तौ तज्जनकपदार्थोपस्थितिपदज्ञानव्यक्त्योः सत्त्वेन हेतुत्वे तत्समानविषयिकशाब्दबोधोत्प
त्त्यधिकरणकालान्तरे तद्व्यक्त्योरुत्पादवारणायोभयमतएव कल्पनीयं तथा च तादृशपदज्ञानव्यक्तेः प्रथमशाब्दबोधोत्पत्तिविनाशात्तद्द्वितीयक्षणे तदुत्प
पादनासम्भवादिति वाच्यम् पदज्ञानस्य पदजन्यपदार्थोपस्थितिद्वारैव हेतुतया तन्नाशेऽपि तज्जन्यपदार्थोपस्थितिसत्त्वेनापत्तिसम्भवात् कर्मत्वत्वाद्यवच्छिन्नवि

शाब्दबोधस्य कर्मत्वाद्यवच्छिन्नमुख्यविशेष्यकघटत्वाद्यवच्छिन्नप्रकारकं॰ (

आकाङ्क्षावाद २

शेष्यकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधत्वमेव प्रभव्यतावच्छेदकं वाच्यम् अतो घटकर्मत्वादिरूपखण्डवाक्यार्थबोधानन्तरं घटकर्मकानयनादिरूपमहावाक्यार्थ
बोधस्यानुपपत्तिः एवं घटत्वावच्छिन्नविशेष्यकनीलादिप्रकारकशाब्दबोधस्य घटत्वाद्यवच्छिन्नमुख्यविशेष्यतानिरूपितधर्मितावच्छेदकतान्यनीलादिप्रकार
ताशाब्दत्वम् अतो घटो नील इत्याद्यवान्तरवाक्यार्थज्ञानपूर्वकनीलो घटः सुन्दरो नीलघटमानयेत्यादिवाक्यजन्यमहावाक्यार्थबोधस्यानुपपत्तिः एवमन्यत्रा
प्यूह्यम् अत्र च बोधद्वयतात्पर्यज्ञानसत्त्वे क्रमिकान्वयबोधद्वयोत्पादात्तादृशज्ञानस्योत्तेजकत्वं स्वीकरणीयम् तत्र प्राथमिकव्यक्तिद्वितीयक्षणोत्पादवारणा
३ याऽगत्या प्रकारान्तरमास्थेयमिति तदुपन्यसत तथाहि राजपदं पुरुषपदार्थान्वितराजपरमित्याकारकस्य हेतुत्वे यत्र विशेषतः पदार्थविषयिकस्यैव तात्पर्यज्ञा
नस्य शाब्दबोधहेतुत्वमावश्यकं सामान्यतस्तत्पदार्थविषयिकस्यैव तस्य हेतुत्वे यत्र लक्षणया पुरुषपदोपस्थापितेनार्थान्तरेण राज्ञोऽन्वयबोधे राजपदो
पस्थापितार्थान्तरे पुरुषस्यान्वयबोधे च वक्तुस्तात्पर्यं न तु पुरुषयोरन्वयबोधे तत्र राजपदं पुरुषपदोपस्थापितार्थान्तरान्वितस्वार्थप्रतीतिजनकत्वाभिप्रायविष
यत्वेतादृशसमभिव्याहारज्ञानस्य राजपदमितरान्वितराजपरं पुरुषपदमितरान्वितपुरुषपरमित्याकारकार्थतात्पर्यज्ञानयो राज्ञः पुरुषपदोपस्थापि
तार्थान्तरस्य च पुरुषेण राजपदोपस्थाप्यार्थान्तरस्यान्वयबोधानुरोधेनावश्यकतया तद्बलाद्राजपुरुषयोरन्वयबोधप्रसङ्गात् तथा चैकवाक्यताभिप्रायेण विष
यित्वरूपसमभिव्याहारज्ञानस्य हेतुत्वे मानाभावः उक्तस्थले तथाविधतात्पर्यज्ञानविरहेऽपि वाऽतिप्रसङ्गविरहात् न च यत्र राजपदं पुरुषान्वितराजपरमित्येता
दृशतात्पर्यग्रहो वर्त्तते अपि च राजपदं पुरुषपदसहकारेण यत्पदार्थान्वितस्वार्थबोधकत्वं तदभिप्रायविषयो न वेत्याकारकसमभिव्याहारसंशयः तद्व्यतिरेकनि
श्चयो वा वर्त्तते तत्र राजपुरुषपदाभ्यां राजपुरुषपदार्थबोधापत्तिवारणाय तादृशपदद्वयजन्यशाब्दबोधे तादृशाभिप्रायविषयित्वज्ञानहेतुत्वमावश्यकमिति वा
च्यम् उक्ततात्पर्यज्ञानसत्त्वे तथाविधसंशयादिसत्त्वेऽपि तादृशशाब्दबोधस्येष्टत्वात् अस्तु वा राजपदं पुरुषपदसहकारेण यत्पुरुषान्वितराजबोधकत्वं तद
भिप्रायविषयत्वाकारकमेवार्थतात्पर्यज्ञानं हेतुः तावतैवोक्तातिप्रसङ्गवारणसम्भवात् एवमन्वयानुभवाभावस्य हेतुत्वेऽपि मानाभावात् उक्तस्थले शा
ब्दबोधोत्पत्तिद्वितीयक्षणे तद्व्यक्तिप्रत्युत्पादकस्यापादकविरहात् घटसामग्र्यव्यवहितोत्तरत्वस्य कार्याधिकरणत्वव्याप्यतयैवावगम्यते ननु कार्योत्पा २
दव्याप्यतापीति स्वोत्पत्तिद्वितीयक्षणस्य स्वाधिकरणत्वं पुनरिष्टमेव तृतीयक्षणे च न तदधिकरणत्वस्याप्यापत्तिसम्भवात् द्वितीयक्षणेन व्यक्तिं प्रति तद्व्यक्ति

त्वेनावश्यकल्पनीयहेतुताकतत्पदार्थोपस्थितित्वकीनामभावादिति अत्रनव्याः प्रकृतिप्रत्ययादीनामानुपूर्वीविशेषावच्छिन्ननिष्ठाकाङ्क्षातत्रप्रत्ययनिष्ठामद-
त्वावच्छिन्नादिरूपानुपूर्वीविशेषावच्छिन्ननिष्ठप्रकृतिनिष्ठाघटपदत्वनीलपदत्वादिरूपानुपूर्वीविशेषावच्छिन्नाव्यवहितोत्तरत्वरूपानुपूर्वीनामार्थधात्वर्थाभेदोपयोग्या-
ऽऽकाङ्क्षा अतोघटः कर्मत्वमानयनंकृतिरित्यादौकर्मत्वादिपदस्याभेदान्वयबोधेनैवघटादिपदसाकाङ्क्षताऽव्यवधानप्रवेशात् घटरूपंपश्येत्यादौरूपादिपदोत्तरा-
म्पदादेर्घटादिपदसाकाङ्क्षताप्रसङ्गः नचैवंघटरूपंपश्येत्यादिद्वन्द्वसमासस्थलेऽमादिपदस्यरूपादिपदव्यवहिततयाघटादिपदसाकाङ्क्षतानुपपत्त्याक-
र्मत्वादौघटाद्यन्वयानुपपत्तिरितिवाच्यम् अमपदत्वावच्छिन्ननिष्ठस्यघटादिपदाव्यवहितोत्तरत्वरूपादिपदाव्यवहितोत्तरत्वस्याप्याकाङ्क्षत्वात् तादृशनानाविधा-
काङ्क्षाज्ञानानामेकैकविधान्वयबोधंप्रतिहेतुत्वव्यभिचारस्याग्रेवारणीयत्वात् यत्तुघटप्रत्यययानुत्तरत्वरूपमव्यवधानमेवाकाङ्क्षाघटकंवाच्यम् घटरूपंपश्येत्या-
दावपितादृशविशिष्टाभावात्मकमव्यवधानमक्षतमेवेतितदसत् तथासतिप्रत्ययाद्यनुपस्थितिदशायांतादृशाव्यवधानस्यदुर्ज्ञेयतयाशाब्दबोधानुपपत्तेः
यावत्प्रत्ययसाधारणस्यप्रत्ययत्वस्यदुर्वचत्वाच्च अथद्वन्द्वस्थलानुरोधेनघटपदाव्यवहितोत्तरत्वरूपादिपदाव्यवहितोत्तरत्वस्यामादिपदनिष्ठस्यकर्मत्वादौघटा-
न्वयबोधोपयिकाकाङ्क्षात्वेघटरूपमित्यादितत्पुरुषस्थलेपिकर्मत्वादौघटान्वयबोधप्रसङ्ग इतिचेन्न तत्पुरुषस्थलीयएकपदस्यविभिन्नपदार्थविशिष्टप-
रतयोक्तस्थलेघटपदत्वाभावेनकर्मत्वेघटान्वयापत्तिविरहात् नचघटपदार्थस्यघटसम्बन्धित्वावच्छिन्नस्यैवकर्मत्वान्वयबोधप्रसङ्गः अभेदेनघटसम्बन्धित्वावच्छि-
न्नान्वितरूपत्वावच्छिन्नस्यैवतत्रकर्मत्वावच्छिन्नतयोपपत्तिसम्भवादितिवाच्यम् तत्पुरुषस्थलेतादृशान्वयबोधतात्पर्यविरहेणैवतदापत्त्यभावात् यत्ररूपांशे
कर्मत्वांशेचघटपदार्थस्यविशेषणतयान्वयबोधेतात्पर्येणघटरूपंपश्येत्यादुच्चरितंतत्रतात्पर्यज्ञानवतांद्विविधबोधएवेष्यते अन्यथापुनरगत्याघट-
रूपमित्याद्यानुपूर्वीज्ञानजन्यकर्मत्वादिविशेष्यकघटादिसम्बन्धिप्रकारकान्वयबोधेघटादिपदधर्मिकस्यकर्मत्वेतरविशेषणतयास्वार्थान्वयबोधपरत्वग्र-
हस्यप्रतिबन्धकत्वंवाच्यम् अथवाघटपदंकर्मत्वान्वितस्वार्थपरमित्येतादृशतात्पर्यग्रहेहेतुतायांधर्मिणिकर्मत्वेतरान्वितस्वार्थपरतयाऽगृह्यमाणत्वंविशेष-
णंदेयम् किंवाविशेषतासम्बन्धावच्छिन्नतादृशस्वार्थपरत्वग्रहाभावस्यस्वाश्रयविशेष्यकत्वसम्बन्धेनवैशिष्ट्यंतादृशतात्पर्यग्रहएवनिवेशनीयम् अतएव
द्वन्द्वार्थतत्पुरुषार्थपरतादृशवाक्यद्वयवतः पुंसउभयतात्पर्यज्ञानयुगपदुभयबोधोपपत्तिः अथतात्पर्यज्ञानेतत्तन्निरुक्तविशेषणेनविशेषितेघटरत्वेता-
दृशानुपूर्वीघटपदंयत्रविशेषणतयाकर्मत्वान्वितस्वार्थपरत्वग्रहः तत्रकर्मत्वविशेष्यकघटान्वयबोधानुपपत्तिरितिवाच्यम् तत्रतादृशबोधस्यानुभ-

आकाङ्क्षा-
वाद
४

५

विकल्पेन तदा विशेषणमनन्तर्भाव्य तात्पर्यज्ञानहेतुत्वान्तरस्य कल्पनीयत्वात् तादृशाकारणतावच्छेदकावच्छिन्नस्य घटमित्यानुपूर्वीज्ञानरूपसहकारिसमवहितस्यैव फ-
लोपधायकत्वोपगमात् न तु हला हृद रूपं पश्येत्यादावतिप्रसङ्गः। उत्तरत्वनिवेशात् रूपं घटस्य पश्येत्यादावमादिपदस्य कर्मत्वादिविशेष्यकघटादिबोधेन साका-
ङ्क्षता एकघटपदाव्यवधानस्यान्यघटपदोत्तरस्य च ज्ञानानन्त्याविथशाब्दबोधापत्तिवारणाय विशिष्य तत्तत्पदाव्यवहितत्वे सति तत्तत्पदोत्तरत्वस्यैव ज्ञानं शाब्दबो- न्नर
धजनकं वाच्यम्। वस्तुतः स्वाव्यवहितत्वविशिष्टोत्तरत्वसम्बन्धेन घटादिपदवत्त्वमेवाकाङ्क्षा विघटकं रूपं घटस्येत्यादावमादिपदस्य तादृशसम्बन्धेन घटपद-
वत्त्वम्। अन्यदीयाव्यवधानस्यान्यदीयोत्तरत्वस्यान्यदीयसम्बन्धत्वाभावात् तादृशविशिष्टसम्बन्धेन कस्यचिदपि घटादिपदस्य तत्रासत्त्वात्। अतः पदव्यक्तिभेदे-
न कार्यकारणभावविरहेऽपि नातिप्रसङ्गः। अथ यादृशनामपदानन्तरं यादृशपदं कदाचिदपि केनचिन्नोच्चरितम्। अथ च तादृशानामेकेन चिन्मोनिना तादृश-
प्रत्ययपदव्यवधानेन लिखितं तादृशलिप्यनुमितं तथाविधपदयोराकाङ्क्षाविरहात् तदनुसन्धानान्नान्वयबोधानुपपत्तिरिति चेन्न तत्राव्यवहितोच्चरितयोस्तथा-
विधपदयोरव्यवधानमपि तादृशाकाङ्क्षाभ्रमादेव शाब्दबोधोपगमात्। यत्र लेखकाभिप्रायविषयतथाविधपदयोरव्यवधानमेव प्रतिसन्धत्ते तावद्यलेखक
एतत्पदार्थान्वितैतत्पदार्थज्ञानवानेतत्पदद्वयज्ञकलिपिकर्तृत्वादित्यादिक्रमेण वाक्यार्थमनुमिनोत्येव न तत्र शाब्दइति। अस्तु वा एतत्पदज्ञानानन्तरमेतत्पद- घटपदप्रयुक्ताम् दव्यवहितसर्वतः
ज्ञानं भवत्विच्छाकारकाभिप्रायविषयित्वरूपानुपूर्व्येवाकाङ्क्षा। स्यचशाहस्य ताननैतो मीमांसकस्य शाब्दव्यवहितोत्तरत्वमपि विनिगमनाविरहेणाका-
ङ्क्षात ज्ञानयोग्यत्वैकल्पकहेतुत्वप्रत्येकं ज्ञानादपि शाब्दबोधस्यानुभविकत्वात् समुच्चितस्यैवोभयविधाकाङ्क्षाज्ञानस्य फलोपधायकत्वे सामग्रीप्रतिबन्धक-
तायामुभयज्ञानस्यैव निवेशनीयतापत्त्या विशेषणविशेष्यभावे विनिगमनाविरहेणाप्रतिबन्धकताद्वयकल्पनापत्तेः परस्परजन्यबोधे परस्परव्यभिचारवारणं चापे-
दर्शयिष्यते आनयनादिपदोत्तरकर्मत्वाद्यन्वयबोधे चानयेत्यादिपदस्य घटमित्यादिपदोत्तरत्वं तादृशपदपूर्वत्वं वाऽऽकाङ्क्षा घटमानयनयघटमित्येतादृशद्विविधा-
नुपूर्वीज्ञानादेव घटकर्मकानयनबोधात्। न चाऽवान्तरबोधजनकाभ्यां घटमित्येतादृशानयेत्येतादृशानुपूर्वीज्ञानाभ्यां घटकर्मकानयनरूपविशिष्टवाक्यार्थता-
त्पर्यज्ञानसहकृताभ्यामेव विशिष्टवाक्यार्थोपपत्तये तत्र घटमानयेत्याद्यानुपूर्वीज्ञानस्य हेतुत्वमप्रामाणिकमिति वाच्यम्। आनय घटमित्याद्यानुपूर्वीज्ञानाद् घटमा-
नयेत्यत्रेव घटकर्मतोद्देश्यकानयनविधेयकबोधस्य वारणाय तादृशबोधं प्रति आनयपदे घटमिति पदोत्तरत्वज्ञानस्य घटमिति पदे वाऽऽनयपदपूर्वत्वज्ञानस्य- ४
घटमानयेत्येतादृशज्ञानादन्वय घटमित्यत्रानयनोद्देश्यकघटकर्मताविधेयकबोधवारणाय तादृशान्वयबोधे घटमिति पदे आनयपदोत्तरत्वज्ञानस्यानयपदे वा

घटमितिपदस्यैव तज्ज्ञानस्य हेतुतायामावश्यकत्वात् शाब्दबोधे प्राग्निर्दिष्टस्यैवोद्देश्यतया चरमनिर्दिष्टस्यैव पदार्थस्य च विधेयतया तत्र तथाविध(
बोधोत्पत्तौ विघातप्रसङ्गाभावात् अत एव करोत्ययमेवेत्यादौ विधेयपरस्य करोत्यादिपदस्यायमित्यादिपदोत्तरत्वाभावादभिमतोद्देश्यविधेयभावेन शा(
ब्दबोधस्यानुपपत्तेः ॥ आलङ्कारिका विधेयाविमर्शदोषमुदाहरन्ति ॥ एवमाख्यातान्तोपस्थाप्यपाकानुकूलकृत्यादिप्रकारकबोधे प्रथमान्त(
नामपदनिष्ठानुपूर्वीविशेषावच्छिन्नाव्यवधानघटितपौर्वापर्यमाकाङ्क्षा अत एव सत्यपि तात्पर्यविशेषादिज्ञाने काष्ठेन तण्डुलं पचतीत्यादौ काष्ठ(
तण्डुलाद्यंशे न पाकभावनान्वयः अपि च प्रथमान्तपदोपस्थाप्ये संख्याप्रकारकबोधे पि तादृशाकाङ्क्षैव नियामिका अन्यथा भावनान्वयस्थल एव संख्या(
न्वयः एवं तत्तन्नामार्थयोरन्वयबोधे समानविभक्तिकत्वं नामपदयोरानुपूर्वीविशेषाकाङ्क्षा नीलस्य घटमित्यादाविव एतस्य घटस्येत्यादावपि तं पद
घटादिपदयोरभेदान्वयबोधानुदयात् धान्येन धनवानित्यादौ चाभेदसम्बन्धेन धनादौ धान्यस्यान्वयः अपि तु तृतीयार्थाभेदे धान्यादेस्तादृशाभेदस्य ध
नादावन्वयः कर्मधारयानुरोधेन तु तरविभक्तिसहितयोरानुपूर्व्याप्याकाङ्क्षात्वं स्वीकरणीयम् एवं सर्वत्र यादृशयादृशानुपूर्वीज्ञानादेव यादृशयादृशबोधः
तत्र तादृशानुपूर्वीविशेषस्यैवाकाङ्क्षात्वमूहनीयम् अथ कर्मत्वादिविशेष्यकघटादिप्रकारकशाब्दबोधेऽम्पदत्वावच्छिन्नविशेष्यकघटपदाव्यवहितोत्तरत्व
ज्ञानत्वेन हेतुता न सम्भवति घटो वा नय घटस्यानयनं कुम्भमानयेत्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे व्यभिचारात् न च कर्मत्वोपस्थापकविभक्तिविशेष्य(
कघटोपस्थापकपदाव्यवहितोत्तरत्वज्ञानत्वेन दर्शितसकलानुपूर्वीज्ञानसाधारणेन हेतुतायां न व्यभिचार इति वाच्यम् द्वितीयकर्मत्वपरतदादिपदघटित(
तन्नदृष्टीत्यादिवाक्यजन्यकर्मत्वविशेष्यकघटप्रकारकज्ञाने व्यभिचारस्यैव तावतापरिहारात् घटोद्देश्यककर्मताविधेयकशाब्दत्वं निरुक्ताकाङ्क्षाज्ञानजन्य
तावच्छेदकं वाच्यम् तदादिपदोपस्थापितघटविशेषितकर्मत्वबोधस्य घटांशे न कर्मत्वबोधः सर्वानुपस्थितपदार्थस्यैव विधेयतया एकपदोपस्थाप्ययोरुद्दे
श्यविधेयभावविरहादिति नायं व्यभिचार इति चेत् अस्त्वेवं तथाप्युक्तानुगतरूपेण हेतुत्वं न संभवति तथा सति घटस्य कर्मत्वमित्यादौ कर्मत्वादिपदस्यैव घ
टादिपदाव्यवहितोत्तराम्पदत्वेन ज्ञानं तत्र कर्मत्वादावाधेयतासंबन्धेन घटादिप्रकारकबोधानुपपत्तेः यत्र वा घटमित्यादावमादिपदे कर्मत्वादिपदत्वादि
पदत्वभ्रमः तदा तेन रूपेण घटादिपदाव्यवहितोत्तरत्वज्ञानादपि तादृशान्वयबोधापत्तेः न च वास्तवविभक्तिविशेष्यकज्ञानत्वेन हेतुत्वोपगम एव द(
र्शितदोषप्रसक्तिः न तु विभक्तित्वावच्छिन्नविशेष्यताकज्ञानत्वेन हेतुत्वोपगमे कर्मत्वपरस्याम्पदत्वभ्रमदशायां विभक्तित्वेन तत्र घटपदाद्यव्यवहितो(

आकांक्षावाद ५

तरत्वज्ञानसम्भवात्तादृशबोधोपपत्तेः अन्यादेः कर्मपदत्वभ्रमदशायां विभक्तित्वेन तज्ज्ञानासम्भवे तादृशान्वयबोधासम्भवाच्चेति वाच्यम् विभक्तित्वाद्यनुपस्थि-
तद्दशायामप्यमुष्य दत्वप्रकारकज्ञानाच्छाब्दबोधोदयात् अमादिपदस्य विभक्तित्वग्रहदशायामप्यमदत्वादिरूपानुपूर्वीविशेषसंस्कारेण ज्ञानं विनाशा-
ब्दबोधानुदयाच्च नानाविधानुपूर्वीज्ञानजन्यतावच्छेदकजातीनां समूहालम्बनानुपूर्वीविषयकज्ञानजन्यशाब्दबोधे सङ्करप्रसङ्गेन व्यभिचारवारणा-
यानुपूर्वीजन्यतावच्छेदकतया जातिकल्पनमावश्यकमिति मैवम् तत्तल्लिङ्ग-परामर्शजन्यतावच्छेदककोटौ स्वसामानाधिकरण्यावच्छिन्नस्वाव्यव-
हितोत्तरत्वलौकिकत्वसम्बन्धेन तद्धेतुविशिष्टं निवेश्य व्यभिचारवारणवदत्रापि तादृशसम्बन्धेन तत्तदानुपूर्वीज्ञानवैशिष्ट्यं तज्जन्यतावच्छेदककोटौ
5 निवेश्य व्यभिचारस्य वारणीयत्वात् अथ कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्येव घटः कर्मत्व-
मित्याद्यानुपूर्वीज्ञानस्यापि हेतुत्वं वक्तव्यं घटः कर्मत्वमानयनं कृतिरित्यादिप्रयोजकवाक्यं श्रुत्वा घटमानयेति वाक्यं स्मरतः प्रयोज्यवृद्धस्य घटकर्मका-
नयनप्रवृत्त्युपलम्भात् घटः कर्मत्वमित्यादिवाक्यप्रवणमुत्पन्नस्य पुंसस्तादृशवाक्यज्ञानादपि घटकर्मकानयनादिबोधात् तथा च तादृशवाक्यादपि
तथाविधस्यापि पुंसस्तथाविधशाब्दबोधापत्तिरीश्वरेणैवेति चेन्न विपरीतव्युत्पन्नस्य पुंसः तादृशवाक्यात् पदार्थोपस्थित्यादिमूलकमानसवाक्यार्थबो-
धस्यैवोपगमात् यदि च तादृशवाक्याधीनविपरीतव्युत्पन्नस्य व्युत्पन्नपुरुषीयवाक्यार्थबोधे शाब्दत्वमनुभवसिद्धम् अन्यथा घटमानयेत्यादिवाक्याधीन
घटकर्मकानयनबोधेऽपि मानसत्वोपगमसम्भवेन शाब्दप्रामाण्यविलयापत्तिरिति विभाव्यते तदा तु तादृशानुपूर्वीज्ञानस्यापि तथाविधशाब्दधीहेतु-
ता तथाविधानुपूर्व्यवच्छिन्नधर्मिकतादृशवाक्यार्थबोधस्वरूपयोग्यत्वग्रहव्युत्पन्नेऽपि तत्सहकारित्वमुपगम्य तादृशातिप्रसङ्गो वारणीयः एवं ता-
दृशवाक्यव्युत्पन्नस्यापि सोऽघटमानयेत्यादिवाक्यात्तादृशबोधस्य तत्फलतात्पर्येण घटमित्याद्यानुपूर्वीज्ञानेऽपि व्युत्पत्तिविशेषस्य सहकारित्वमुप-
गन्तव्यम् अथ कर्मत्वाद्यवगृहीतघटादिपदशक्तिकस्यापि पुंसो घटमित्याद्यानुपूर्वीज्ञानदशायां कुतः कर्मत्वमित्यादिनिराकाङ्क्षाकाङ्क्ष-घटक-
पदज्ञानाधीनपदार्थोपस्थितिसत्त्वेऽपि घटकर्मत्वाद्यभेदान्वयबोधवारणाय तादृशान्वयबोधे तु रपदज्ञानजन्यघटोपस्थितित्वाद्यद्ज्ञानजन्यकर्मत्वो- ५
पस्थितित्वादिना हेतुत्वमवश्यमेवस्वीकरणीयम् तथा च तादृशानुपूर्वीज्ञानस्य तादृशानुपूर्वीघटकतत्तत्पदज्ञानजन्यतत्तत्पदार्थोपस्थितेश्च पृथक्का-
रणत्वकल्पनापेक्षया लाघवात्तादृशानुपूर्वीप्रकारकज्ञानजन्यतत्तत्पदार्थोपस्थितत्वादिनैकैकहेतुताकल्पनमुचितमिति शाब्दबोधेनाकाङ्क्षा

त्वं हेतुः अर्पितहेतुतावच्छेदकं न च विनिगमनाविरहात् तत्पदार्थोपस्थापकानुपूर्वीज्ञानत्वेन हेतुत्वं निष्प्रत्यूहमेवेति वाच्यम् तत्पदार्थोपस्थापकानुपूर्वीज्ञा-
नत्वेन हेतुत्वोपगमे आनुपूर्वीज्ञानजन्यपदार्थोपस्थित्युत्पादक्षण एव शाब्दबोधापत्तेः आनुपूर्वीज्ञानरूपकारणस्य प्राक्सत्त्वात् न च कारणतावच्छेदकविशि-
ष्टस्य प्राक्सत्तायाः कार्यौत्पादप्रयोजकतया पदार्थोपस्थितेः प्राक्क्षणे आनुपूर्वीज्ञानसत्त्वेपि तद्रूपधायकतासम्बन्धेन पदार्थोपस्थितिविशिष्टस्य तस्याः सत्त्वाभा-
वात् प्रसङ्ग इति वाच्यम् विशिष्टसत्तायाः कार्यौत्पादप्रयोजकत्वोपगमे विशिष्टसत्ताया एव विशेषणसत्तायाप्तिधायकत्वेन गौरवात् वस्तुतस्तु पदार्थोप-
स्थापकानुपूर्वीज्ञानत्वेन शाब्दबोधहेतुत्वस्य पदार्थोपस्थितिपूर्ववृत्तित्वमगृहीत्वाग्रहीतुमशक्यत्वेन तादृशधर्मस्यान्यथासिद्धिनिरूपकत्वे अन्यकार्यप्रति-
पूर्ववृत्तित्वं गृहीत्वैव यद्धर्मावच्छिन्नस्य प्रकृतकार्यपूर्ववर्तिताग्रहः तद्धर्मावच्छिन्नस्यान्यथासिद्धत्वात् अत एव परामर्शजन्यत्वे व्याप्तिज्ञानस्यानुमितिहेतुत्वं
अनुमितिजनकत्वेन दण्डस्य घटजनकत्वे प्रत्याख्यातं दीधितिकारेण तथा च नोपदर्शितविनिगमनाविरहावकाशः एतेन विशिष्टस्य प्राक्सत्त्वं यदि पूर्वका-
लत्वे विशेष्यविशेषणोभयसत्तारूपं तथैवोत्क्रमेण विशिष्टस्य प्राक्सत्तायाः कार्यौत्पत्तिप्रयोजकत्वे गौरवं तदेव न अर्पितविशेषणादेर्विशिष्टावच्छिन्ननिरू-
पितविलक्षणाधिकरणत्वमेव विशिष्टसत्त्वं तच्च विशेष्यविशेषणोभयाधिकरणत्वं नियतं तस्य तत्कार्यप्रयोजकत्वे न किञ्चिद्गौरवमिति दुर्वार एवोक्तविनि-
गमनाविरह इति परास्तम् न च घटानुपूर्वीज्ञानविशेषावच्छिन्नपदज्ञानजन्यपदार्थोपस्थितिवर्त्तिते तत्र तादृशपदज्ञाने च न शाब्दबोधापत्तिवारणायानुपूर्वी
विशेषप्रकारकज्ञानस्यापि शाब्दधीहेतुत्वमावश्यकमिति वाच्यम् तत्र शाब्दबुद्धेरिष्टत्वात् अस्तु वा कारणतावच्छेदकविशिष्टप्राक्सत्त्वमेव कार्यौपधाने
तन्त्रम् यत्रानुपूर्वीविशेषावच्छिन्नपदज्ञानजन्यपदार्थोपस्थितित्वापेक्षया लाघवात् पदार्थोपस्थितिमत्पदज्ञानत्वेनैव हेतुत्वमुचितम् आनुपूर्वीविशेषघ-
टकपदस्य तु त्वत्र सप्तसोतिरिक्ताकाङ्क्षापदज्ञानजन्यपदार्थोपस्थितिसत्त्वेपि न शाब्दबोधापत्तिः आकाङ्क्षापदज्ञानस्य व्यापारविरहात् व्यापारसत्त्वे आकाङ्क्षा-
ज्ञाननाशेपि कार्यौत्पत्तिरिष्टैव न च तत्पदोपस्थितेर्व्यापारतानिर्वाहाय तस्यापि स्वानन्तरक्षणे हेतुताया आवश्यकत्वे नीयतयोः तथाविधगुरुधर्मपुरस्कारेण तदपेक्षया॰
साकाङ्क्षपदजन्यपदार्थोपस्थितेर्हेतुताकल्पनमेव न्याय्यमिति वाच्यम् घटकर्मत्वान्वयबोधे घटं कुम्भमित्याद्यानुपूर्वीप्रकारकज्ञानजन्यघटोपस्थितत्वा-
दिना हेतुत्वे पदभेदेनानन्तकारणतायामवच्छेदकगौरवात् तदपेक्षया तत्तत्स्थले तत्तदानुपूर्वीज्ञानत्वेनैव हेतुतानां पदार्थोपस्थितेश्च सामान्यतो घटोपस्थि-
तित्वकर्मत्वोपस्थितित्वाभ्यां हेतुताद्वयस्य न्याय्यत्वात् पदार्थोपस्थितिनिष्ठजनकतायामानुपूर्वीज्ञानजन्यतातत्तदानुपूर्वीज्ञानजन्यतावच्छेदकत्वे पदार्थोपस्थितित्वे

आकाङ्क्षावाद ६

6

नक्षंमतस्य विशेषणविशेष्यभावेविनिगमनाविरहापत्तावेति तदसत् पदार्थोपस्थितेःसामान्यतो घटोपस्थितित्वादिना हेतुत्वेउक्तातिप्रसङ्गःस्यैववार
णासम्भवात् तथाहि अव्यवहितप्राक्क्षणावच्छिन्नसामग्र्यादिकारणतायाः कार्यमात्रनियाप्यत्वे किञ्चिदहारककारणतावच्छेदिकावच्छिन्नस्तोमएव
सामग्रीशब्देनविवक्षणीयः अन्यथास्मृतिस्वर्गाव्यवहितपूर्वक्षणेनिश्चयत्वे गत्वावच्छिन्नसत्त्वेनतद्घटितसामग्र्यसत्त्वात्तदुत्पादसामग्र्यानियम्यत्वायत्तेः
एवंचोक्तस्थलेसाकाङ्क्षपदज्ञानस्यस्वव्यापारकस्यासत्त्वेपि साक्षाज्जनकतावच्छेदकीभूततत्पदार्थोपस्थितित्वावच्छिन्नघटितसामग्र्यासत्त्वैवेति नचसाम
ग्रीव्याप्तौसाक्षात्कारणतावच्छेदकावच्छिन्नानामिवव्यापारघटितकारणतावच्छेदकावच्छिन्नीयव्यापारस्यसामग्रीशरीरेऽन्तर्भावनीयतयाप्रकृतस्थलेनिराका
ङ्क्षपदाधीनोपस्थितेराकाङ्क्षाज्ञानजन्यत्वाभावात् आकाङ्क्षाज्ञानजन्यव्यापारस्यासत्त्वात्तत्सामग्रीसमवहितत्वमितिवाच्यम् उक्तस्थलएवसाकाङ्क्षपदयोःसमूह
हालम्बनमेकंज्ञानंतत्पदार्थोपस्थितेर्वस्तुगत्याऽऽकाङ्क्षाविशिष्टपदविषयकंयज्ज्ञानंतज्जन्यत्वेनतद्व्यापारसम्भवात् नचहारककारणतावच्छेदकोयोधर्मस्त
दवच्छिन्नजनकतारूपव्यापारसत्त्वमेवकार्योत्पादप्रयोजकंवक्तव्यंप्रकृतेचसमूहालम्बनोपस्थितेर्वास्तवाकाङ्क्षाविशिष्टपदज्ञानजन्यत्वेपितस्याकाङ्क्षा
विशिष्टपदज्ञानत्वेनाहेतुत्वात् प्रकृतस्थलेतादृशव्यापारस्यैवदुर्लभत्वात् नचतत्तत्पदानुपूर्वीविशेषज्ञानजन्यपदार्थोपस्थितित्वेनहेतुत्वमतएवोक्तसमूहाल
म्बनात्तदानुपूर्वीज्ञानजन्यपदार्थोपस्थितिबलात् घटकर्मत्वयोर्भेदान्वयबोधोदुर्वार इतिवाच्यम् घटमित्याद्यानुपूर्वीज्ञानत्वेघटपदज्ञानत्वावच्छिन्नजनक
ताकोपस्थितित्वेनहेतुत्वाभ्युपगमात् तादृशसमूहालम्बनस्यचगृहीतघटादिकमादिपदज्ञानत्वेनैतादृशोपस्थितिजनकत्वात् यन्तत्वजन्यपदार्थोप
स्थितिसम्बन्धेनाकाङ्क्षाज्ञानस्यसत्त्वादेवशाब्दबोधहेतुत्वंस्वीकरणीयम् जन्यताचतत्तदानुपूर्वीविशेषज्ञानविषयाकाङ्क्षाघटकतत्तत्पदत्वावच्छिन्ननिरूपि
ताग्राह्या आकाङ्क्षाविशिष्टपदज्ञानजन्योपस्थितत्वेनहेतुत्वेप्युक्तस्थलीयसमूहालम्बनजन्योपस्थितवारणाय तादृशजन्यतानिवेशस्यावश्यकत्वात् एवंच
दर्शितस्थलेआकाङ्क्षाजनकतावच्छेदकसम्बन्धात्मकतादृशोपस्थितिविरहान्नशाब्दबोधापत्तिरितितदपिनसमञ्जसम् स्वजन्यपदार्थोपस्थितिसम्बन्धेनशाब्द
बोधहेतुत्वस्यतस्मिन्पदार्थोपस्थितिमगृहीत्वागृहीतुमशक्यत्वेनतेनसम्बन्धेनाकाङ्क्षाज्ञानस्यान्वयासिद्धत्वात् तादृशोपस्थितित्वेनहेतुतायांमानाभा ६
वाच्चेति अत्रोच्यते घटमित्याद्यानुपूर्वीज्ञानघटाद्युपस्थितत्वेनशाब्दबोधहेतुत्वेशब्दलाघवात् लौकिकघटपटादिरूपानन्तार्थभेदभिन्नास्तुघटपदजन्यपदार्थो
पस्थितहेतुतास्तदवच्छेदककोटौघटपदाव्यवहितोत्तरत्वावच्छिन्नावगाहित्वस्यनिवेशाधिक्येनानन्तस्थलेकारणतावच्छेदकगौरवात् तत्रहेतुपदप्रका

रकजन्यतन्न दर्थोपस्थितित्वेन हेतुतायां घटमित्येतादृशानुपूर्वीज्ञानस्य त्वार्थविशेषमनिवेश्य तादृशानुपूर्वीज्ञानविशिष्टशाब्दत्वावच्छिन्नं प्रतितादृ-
शानुपूर्वीज्ञानत्वेन हेतुतायाश्च कल्पने लाघवादाकाङ्क्षाज्ञानहेतुतासिद्धिः नचानुपूर्वीज्ञानविशिष्टशाब्दत्वावच्छिन्नं प्रतितादृशानुपूर्वीज्ञानविशेषणज्ञान
जन्यतावच्छेदककोटौ विषयितानिवेशवद्घटपदादिपदज्ञानजन्यघटाद्युपस्थितत्वावच्छिन्नजन्यतावच्छेदकघटकघटकारणत्वादिशाब्दबोधसाधारण्य
तादृशोपस्थितिविशिष्टशाब्दत्वेन समं लक्षणाया घटपदार्थघटककर्मत्वबोधसाधारणस्य घटमित्येतादृशानुपूर्वीज्ञानजन्यतावच्छेदकस्य व्याप्यव्यापकभा
वाऽसम्भवेन तयोः परस्परसहकारित्वं न सम्भवतीति वाच्यम् कार्यतावच्छेदकसामानाधिकरण्यमात्रस्य परस्परसहकारितायां नियामकत्वात् नचाम्पदस्य स्व
विभक्तित्वेन लाक्षणिकत्वविरहात्कर्मत्वमेवार्थः तथाचाम्पदज्ञानजन्योपस्थितेर्नार्थभेदेन कारणताभेदः कर्मत्वावच्छिन्नविषयिकज्ञानजन्योपस्थितत्वेना
वश्यकल्पनीयतया हेतुतायामेवावच्छेदककोटावम्पदज्ञानांशे घटपदाव्यवहितोत्तरत्वावगाहित्वेन निवेशनमुचितम् अमादत्वावच्छिन्नविशेष्यघटपदा-
व्यवहितोत्तरत्वज्ञानत्वेन हेतुत्वान्तरकल्पनापेक्षया क्लृप्तायामेकहेतुतायामेवावच्छेदकसन्निवेशगौरवस्यान्याय्यत्वादिति वाच्यम् अमादिपदस्यापि श-
क्तिभ्रमेण कारणत्वादिबोधकत्वात् तज्ज्ञानस्यार्थभेदेन कारणताबाहुल्यात् एवं सुविभक्तेर्लक्षणार्थेऽनादितात्पर्यमात्रं कल्प्यते न त्वनन्यलक्षणा-
याः आधुनिकतात्पर्यस्य च ज्ञानसत्वेऽर्थान्तरशाब्दबोधोपपत्तये तथा च लक्षणायाम् आद्यार्थान्तरबोधकत्वमेवेत्यवधेयम् इदमत्राभिधेयम् । आकाङ्क्षा-
ज्ञानस्य शाब्दबोधहेतुतामते यत्र क्षणे घटमित्येतादृशानुपूर्वीज्ञानजन्यपदार्थोपस्थितिर्विद्यते तादृशज्ञानं विनष्टं तदुत्तरक्षणे शाब्दबोधानुदयात् त-
दनीसमानानुमित्याद्युपपत्तये तत्र शाब्दसामग्रीप्रतिबन्धकतायां घटपदज्ञानजन्यघटोपस्थित्यम्पदज्ञानजन्यकर्मत्वोपस्थितितादृशानुपूर्वीज्ञान- तादृशी,
मपि निवेशनीयम् तथा च तेषां त्रयाणामन्योन्येन योग्यताज्ञानादिरूपकारणेन समं विशेषणविशेष्यभावे विनिगमनाविरहेण सामग्रीप्रतिबन्धक-
ताबाहुल्यप्रसङ्गात् आकाङ्क्षाज्ञानजन्याकाङ्क्षाज्ञानानाशेऽपि तज्जन्यपदार्थोपस्थितिसत्वेन शाब्दबोधस्यैवोत्पत्त्या समानविषयिकानुमित्याद्यभावेन
तथाविधानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थितिरेव निवेशनीये तथा च तयोर्द्वयोरेव परस्परविशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबन्धकता-
बाहुल्यादेतन्मतापेक्षया नव्यमते प्रतिबन्धकताधिक्यं स्फुटम् नचानुपूर्वीविशेषणज्ञानशाब्दबोधहेतुतामतेऽम्पदं घटपदाव्यवहितोत्तरत्वाभाववदिति।

द्वि बो॰

शा॰बो॰

द्विमानसंशयनिताहशेद्वांविशिष्टविरहंयावच्छक्तज्ञानजन्यघटोपस्थितिर्मद्घटज्ञानजन्यकर्मोपस्थितिर्घटितशाब्दबोधसामग्र्याः प्रतिबन्धकत्वाकल्पनेन
तादृशतादृशसामग्रीत्वेन अस्मदस्थर्मिकघटपदाव्यवहितोत्तरत्वनिर्णयस्यावश्यकतया तथाविधविपरीतनिश्चयवशादेव तादृशमानसानुत्पादाति
र्वाह इति वाच्यम् यादृशयादृशज्ञाने विपरीतनिश्चयविषयातथाविधानुपूर्वीज्ञानविरोधितथाविधकतिपययज्ञानेषु तादृशसामग्र्याः प्रतिबन्धकत्व
7 कल्पनेपि प्रतिबन्धकत्वात् घटादावपि समानविषयिकानुमितौ घटपदादिविषयिकानन्तविधमानसादौ च तथाविधसामग्रीप्रतिबन्धकतायाउपद
र्शितविनिगमनाविरहेण प्रतिबन्धकताधिक्यप्रयुक्तगौरवस्याशक्यसमाधानत्वात् न चाकाङ्क्षाज्ञानस्य शाब्दबोधहेतुतामतेपि सामग्रीप्रतिबन्धकता
यां निवेशनीयं किं तु जन्यतासम्बन्धेन घटमिति एतादृशानुपूर्वीज्ञानविशिष्टघटकर्मत्वोपस्थितिरेव तथा च नोक्तगौरवावकाशः न च तादृशानुपूर्वीज्ञानना
शेन जन्यपदार्थोपस्थितिसत्त्वे समानविषयिकानुमित्यनुत्पत्तेः विशेषणाभावेन विशिष्टबुद्धितसामग्र्यभावस्यावश्यकत्वादिति वाच्यम् तथा सति घटपद
ज्ञानस्य घटत्वप्रकारकज्ञानाद्घटोपस्थितिसत्तादानीमेवानुपूर्वीज्ञानं तत्रापि भवन्मते शाब्दबोधोदयेन तत्र समानविषयिकानुमित्याद्यापत्तेः जन्यतासम्बन्धेना
नुपूर्वीज्ञानविशिष्टपदार्थोपस्थितेरभावात् जनकतासम्बन्धेन पदार्थोपस्थितिविशिष्टानुपूर्वीज्ञानस्य निवेशमादाय विनिगमनाविरहस्य दुर्वारत्वाच्च।
उपस्थितौ तद्विशेषणीभूततादृशज्ञाने वा कारणत्वेन वैशिष्ट्यनिवेशे पुनः तत्र विनिगमकत्वानस्यावश्यकत्वाच्च अत्रेदं समाधीयते आकाङ्क्षाज्ञानस्य शा
ब्दबोधहेतुतामतेपि तत्राशनन्तरं जन्यपदार्थोपस्थितिवलाद्शाब्दबोधस्वीक्रियते पदार्थोपस्थितेस्तद्व्यापारत्वोपगमात् शाब्दबोधाव्यवहितपूर्वतत्क्षणे त
टि॰ त्त्वेन तत्कारणत्वानुपपत्तिः एवं च भवन्मते पदैतन्मते पदानुपूर्वीविशेषज्ञानजन्यपदार्थोपस्थितिरेव सामग्रीप्रतिबन्धकतायां निवेशनीये न तज्ज्ञानत्वे
नानुपूर्वीविशेषज्ञानस्य निवेशमादाय विनिगमनाविरहस्य दुर्वारत्वाच्च उपस्थितौ तद्विशेषणीभूततादृशज्ञाने वा वैशिष्ट्यनिवेशे तत्र विनिगमकत्वा
नस्यावश्यकत्वाच्च नोक्तगौरवावकाशः घटादिपदेष्वनुपूर्वीसत्त्वे कुम्भादिपदेष्वनुपूर्वीसत्त्वे घटकुम्भकर्मत्वमिति तादृशनानाविषयिकसमूहालम्बनस्य
घटकर्मतायामुपस्थितौ अनन्तरं शाब्दबोधापत्तेश्च घटपदज्ञानत्वावच्छिन्नकारणतावद्घटोपस्थितिरूपकारणविरहेणैव न सम्भवति यत्र भूतघटत्वेनादृशा ८
विपरीतानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थितिर्वर्तते न तत्र घटमिति एतादृशज्ञानजन्यव्यापारविरहादेव न शाब्दबोधापत्तिः अव्यवहितपूर्वतत्क्षणे कारणव्यापार

समवधानस्यापि कार्योत्पत्तावपेक्षितत्वादिति । यत्र तादृशास्थले एव घटमित्याद्यानुपूर्वीज्ञानध्वंसः संस्कारादिकं वर्त्तते तत्रापि नातिप्रसङ्गः । ध्वंससंस्कारादेरानुपूर्वीज्ञा-
नजन्यत्वेपि घटकर्मत्वान्वयबोधजनकताविरहेण व्यापारताविरहात् । तज्जन्यत्वे सति प्रकृतकार्यासाधारणकारणस्यैव तद्व्यापारत्वात् । न च तादृशास्थले एव घट-
मित्याद्यानुपूर्वीज्ञानजन्यतादृशानुपूर्वीघटकयत्किञ्चिद्विषयिणी प्रकृतशाब्दबोधोपयिकयोग्यतादिविषयिणीस्मृतिरेव वृशेनोत्पन्नात तत्तादृशस्मृतेः तथा-
विधानुपूर्वीज्ञानजन्यत्वेन प्रकृतशाब्दबोधजनकत्वेन च व्यापारत्वसंभवाच्छाब्दबोधापत्तिर्दुर्वारैवेति वाच्यम् । करणजन्यतावच्छेदकीभूतो यः प्रकृतकार्यजन्य-
तावच्छेदकीभूतो यो धर्मस्तदवच्छिन्नस्यैव प्रकृते व्यापारपदेन विवक्षणात् प्रकृतशाब्दबोधजनकतावच्छेदकयोग्यताज्ञानत्वं घटमित्याद्यानुपूर्वीज्ञानजन्य-
तावच्छेदकत्वविरहेण तादृशस्मृतेरतिप्रसक्तत्वात् । न चैवं घटाद्युपस्थितेरपि व्यापारत्वासम्भवः घटपदज्ञानत्वावच्छिन्नजनकताकघटोपस्थितित्वादेर्घटपदज्ञाना-
दिजन्यतानवच्छेदकत्वादिति वाच्यम् । तादृशधर्मस्याश्रयस्य यापदज्ञानजन्यतावच्छेदकत्वेपि यादृशानतिप्रसक्तरूपो धर्मस्तज्जन्यतावच्छेदकस्तेनैव शाब्दबोधे-
त्वताघास्वीकरणीयतयानुपपत्तिविरहात् । यत्र करणजन्यतावच्छेदके फलजनकतावच्छेदकत्वं संभवति तत्रैवेयं रीतिः । अन्यत्र साक्षात्कारजनकतावच्छेदका-
वच्छिन्नसमवधानमेव कार्योत्पत्तिप्रयोजकमुपेयं कलशमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्य
भिचारवारणाय च स्वाव्यवहितोत्तरोपस्थित्यव्यवहितोत्तरत्वसम्बन्धेन तत्तदानुपूर्वीज्ञानविशिष्टत्वं तत्तदानुपूर्वीज्ञानजन्यतावच्छेदकमुपेयमतः आनुपूर्वीज्ञाननाशा-
नन्तरोत्पन्नतज्जन्योपस्थितिजन्यशाब्दबोधस्य नासङ्ग्रहः इत्यादिक । घटाकाङ्क्षासंशयाच्छाब्दबोधानुत्पत्त्या आकाङ्क्षानिश्चयत्वेनैव शाब्दबोधे हेतुता वाच्या तदपेक्षया लाघवा-
न्निराकाङ्क्षाज्ञानत्वेन प्रतिबन्धकत्वमेवोचितम् । न च कर्मत्वपदं घटपदनिराकाङ्क्षमिति तादृशज्ञानदशायां घटमित्याद्यानुपूर्वीज्ञानादपि शाब्दबोधानुपपत्तिः तत्पद-
घज्ञानजन्यशाब्दबोधे तद्धर्मिकापरपदार्थाकाङ्क्षाविरहज्ञानत्वेन प्रतिबन्धकत्वं न सम्भवति घटपदकर्मत्वपदज्ञानजन्यघटकर्मत्वभेदान्वयबोधरूपप्रतिबध्यस्याप्र-
सिद्धेः घटपदामपदज्ञानजन्ये घटकर्मत्वयोर्भेदान्वयबोधेऽमपदधर्मिकघटपदाकाङ्क्षाविरहज्ञानस्य प्रतिबन्धकतया च घटः कर्मत्वमित्यादिवाक्याच्छाब्दबोधापत्ति-
र्दुर्वारैवेति वाच्यम् । यतो घटः कर्मत्वमित्यादिपदज्ञानाद्घटकर्मत्वयोर्भेदान्वयबोधवारणाय निराकाङ्क्षत्वज्ञानस्य प्रतिबन्धकता न कल्प्यते तत्र घटपदत्वाम्पदयोः
प्रकारकज्ञानजन्यघटकर्मत्वोपस्थितिरूपकारणविरहेणैव तादृशान्वयबोधवारणसम्भवात् । भवन्मते पदार्थोपस्थितीनां तादृशरूपेण कारणताया आवश्य-
कत्वेन प्रागेव दर्शितत्वात् । अपि त्वमपदघटपदयोस्तादृशविपरीतानुपूर्वीकपदज्ञानात्तादृशान्वयबोधापत्तिवारणे तथा चामपदत्वप्रकारकज्ञानेऽपि न ज्ञानजन्यशाब्द-
बोधे अमपदत्वावच्छिन्नधर्मिकघटपदाव्यवहितोत्तरत्वाभावप्रकारकज्ञानत्वेनैव प्रतिबन्धकत्वं कल्प्यते । न च तत्रानुपपत्तिलेशोपि न च यत्रामपदे घटपदाव्यवहितो-

आकाङ्क्षा
वादः

वच्छिन्नाभावस्यैव निवेशनीयत्वगौरवात् आकाङ्क्षानिश्चयत्वा ४८

त्पर्याभावज्ञानं वक्तृनैकल्पनामित्याकारकानुपूर्वीज्ञानं च नत्र च शाब्दबोधे व्यभिचारः तथाबोधे निराकाङ्क्षज्ञानपदार्थस्यैव तदभावजन्यतावच्छेदकत्वोपगमात् तत्तम
द्वत्वप्रकारेण निराकाङ्क्षत्वाभावज्ञानस्य तत्तत्पदत्वप्रकारकज्ञानजन्यपदार्थोपस्थितीनां चाभावेनान्यसहकारेणोत्पन्नेऽप्यघटकत्वोपगमान्नातिप्रसङ्गः य
त्तात्पर्यं धर्मितावच्छेदकीकृत्य तत्तत्पदार्थवदिति तत्तत्पदज्ञानेनन्वा तद्भावज्ञाने तत्राप्यम्पदत्वादिप्रकारकज्ञानादिनैवान्वयबोधरतिनद्दसत संशयस्या
धारणस्याकाङ्क्षाविरहज्ञानस्य प्रतिबन्धकत्वेः प्रामाण्यनिश्चयत्वावच्छिन्नदेतत्तायामप्रामाण्यज्ञानत्वावच्छिन्नाभावस्यैव निवेशनीयत्वात् एवं निराकाङ्क्षज्ञान
स्य प्रतिबन्धकत्वे हरपदत्वाम्पदत्वप्रकारकज्ञानजन्यपदार्थोपस्थितिविरहिताऽनुमितिसामग्रीप्रतिबन्धकतायामेकत्रैवाम्पदत्वावच्छिन्नधर्मिकहरपदाकाङ्क्षाभाव
हरपदत्वावच्छिन्नधर्मिकाम्पदत्वाकाङ्क्षाभावग्रहाभावौ निवेशनीयौ तथाविधैकतरज्ञानसत्त्व एव शाब्दबोधानुदयेन समानविषयिकानुमितेरुत्पत्तिरिति तयो
र्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवम् प्रमितकाते वाम्पदत्वावच्छिन्नधर्मिकहरपदसाकाङ्क्षत्वग्रहयोरेकतरसत्त्व एव कार्योत्पत्त्या तादृशज्ञानयो
रेकतरत्वं निवेश्य एव कारणत्वस्य कल्पनात् तयोर्विशेषणविशेष्यभावेन विनिगमनाविरहस्यातिप्रसक्तिः एवं निराकाङ्क्षताज्ञानस्य प्रतिबन्धकतामतेऽम्पद
त्वादिसामानाधिकरण्येन हरपदे नराम्पदे हरपदावदिति तत्तत्ताभावग्रहस्यैव प्रतिबन्धकतया उपगन्तव्यतया नाघं दोषद्वयं तिवाच्यम् तथा सति पदव्यक्तिभेदेना
नन्तप्रतिबन्धकतापातात् न चाकाङ्क्षाज्ञानस्याऽपि पदव्यक्तिभेदप्रयोजकः एकपदधर्मिकाकाङ्क्षाज्ञानदशायां समानानुपूर्वीकपदव्यक्त्यन्तरमादाय धर्मिकतत्तदर्थपर
त्वग्रहसत्त्वे शाब्दबोधापत्तिवारणाय तत्तत्पदधर्मिकाकाङ्क्षाज्ञानत्वेन तथाविधतात्पर्यज्ञानत्वाभ्यां शाब्दबोधहेतुतामभ्युपेत्य तादृशाकाङ्क्षाज्ञानतात्पर्यज्ञानयोः पर
स्परसहकारस्यावश्यकत्वादिति वाच्यम् तत्पदावच्छिन्नतात्पर्यं तत्कर्मत्वपदमित्याकारकस्यानुपूर्वीविशेषधर्मितावच्छेदकतात्पर्यज्ञानस्यैव शाब्दबो
धहेतुत्वोपगमेनोक्तातिप्रसङ्गनिरासात् न चैवमाकाङ्क्षाज्ञानस्य शाब्दबोधहेतुत्वमकिञ्चित्करं तत्कर्मत्वमित्यादौ तादृशतात्पर्यज्ञानविरहेऽपि शाब्दबो
धानुत्पादसंभवादिति वाच्यम् तादृशतात्पर्यज्ञानस्यैवाकाङ्क्षाज्ञानतया तद्धेतुतायैवाकाङ्क्षाज्ञानहेतुतासिद्धेः आनुपूर्वीविशेषधर्मितावच्छेदकतात्पर्यज्ञानस्य
तात्पर्यधर्मितावच्छेदकानुपूर्वीविशेषज्ञानस्य वा हेतुत्वमित्यत्र विनिगमनाविरहेण कारणताद्वयस्य प्रसक्त्या नु विपदव्यक्तिभेदेन कारणताकल्पनापत्त्या
लाघवस्यातत्त्वात् न च भवन्मतेऽपि विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकनिराकाङ्क्षत्वज्ञानाभावविशिष्टविशेष्यकतात्पर्यज्ञानत्वेनैव हेतुत्वोपगमान्नो
क्तदोष इति वाच्यम् निराकाङ्क्षत्वज्ञाने तत्प्रकारीयत्वनिवेशनेन गौरवात् ॥ इति श्रीरघुदेवभट्टाचार्यविरचितमाकाङ्क्षावादः ॥ इष्वग्निवसुसंके मि ८
ते विक्रमादित्यवत्सरे चैत्रशुक्लाष्टमीचन्द्रवारे लेखि यथामति बालगोपालविदुषाऽऽकाङ्क्षावादोऽमलाक्षरैः स्वार्थं परार्थं चैतेन तप्यतां श्रीगुरुः सदा २ ॥

पत्र ८